ट्लेटः प्रथमस्य डारौरसः भविता तासस्त्योर्लोपः सादौ प्रत्यये रि च रादौ प्रत्यये तथा भवितारौ
भवितारः भवितासि भवितास्थः भवितास्थ भवितास्मि भवितास्वः भवितास्मः लृट् शेषे च भवि
ष्यदर्थाद्धातोर्लृट् स्यात् क्रियार्थायां क्रियायां सत्यामसत्यां च स्य इट् भविष्यति भविष्यतः भवि
ष्यन्ति भविष्यसि भविष्यथः भविष्यथ भविष्यामि भविष्यावः भविष्यामः लोट् च विध्याद्यर्थेषु धातो

लघु
कौ॰
३९

लोट् च आशिषि लिङ्लोटौ एरुः लोट इकारस्य उः भवतु तुह्योस्तातङाशिष्यन्यतरस्यां आशिषि तुह्यो
स्तातङ्वा परत्वात्सर्वादेशः भवतात् लोटो लङ्वत् लोटस्तामादयः सलोपश्च तस्थस्थमिपां तांतंतामः
ङितश्चतुर्णां तामादयः स्युः भवतां भवंतु सेर्ह्यपिच्च लोटः सेर्हिः सोऽपिच्च अतो हेः लुक् भव भवतात् भव
तं भवत मेर्निः लोटः आडुत्तमस्य पिच्च लोडुत्तमस्याट् सोऽपिच्च हिन्योरुत्वेन उकारोच्चारणसामर्थ्यात् भ
वानि नित्यं ङितः सकारान्तस्य ङिदुत्तमस्य नित्यं लोपः अलोन्त्यस्येति सलोपः भवाव भवाम अनद्यत
ने लङ् अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् लुङ्लङ्लृङ्क्ष्वडुदात्तः एष्वंगस्याट् इतश्च ङितो लस्य परस्मैप
दमिकारान्तस्य लोपः अभवत् अभवतां अभवन् अभवः अभवतं अभवत अभवं अभवाव अभ
वाव अभवाम विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् एष्वर्थेषु धातोर्लिङ् यासुट् परस्मै
पदेषूदात्तो ङिच्च लिङः परस्मैपदानां यासुडागमो ङिच्च लिङः सलोपोऽनन्त्यस्य सार्वधातुकलिङोऽनं
त्यस्य सस्य लोपः इति प्राप्ते अतो येयः अतः परस्य सार्वधातुकावयवस्य यास इत्यस्य इय् गुणः लो राम

३९

योव्योर्वलि भवेत् भवेतां झेर्जुस् लिङः भवेयुः भवेः भवेतं भवेत भवेयं भवेव भवेम लिङाशि
षि आशिषि लिङ् लिङार्द्धधातुकसंज्ञः किदाशिषि आशिषि लिङो यासुट् कित् स्कोरिति
सलोपः क्ङिति च गित् कित् ङिन्निमित्तेरिग्लक्षणे गुणवृद्धी न स्तः भूयात् भूयास्तां भूयासुः भू
याः भूयास्तं भूयास्त भूयासं भूयास्व भूयास्म लुङ् भूतार्थधातोर्लुङ् माङि लुङ् सर्वलकारा
पवादः स्मोत्तरे लङ् च स्मोत्तरे माङि लङ् स्याच्च लुङ् च्लि लुङि शबाद्यपवादः च्लेः सिच् गातिस्था
घुपाभूभ्यः सिचः परस्मैपदेषु लुक् गापाविहेणादेशपिबती गृह्येते भूसुवोस्तिङि भूसुवत
योः सार्वधातुके तिङि गुणो न अभूत् अभूतां अभूवन् अभूः अभूतं अभूत अभूवं अभूव अभूम
न माङ्योगे अडाटौ न स्तः मा भवान् भूत् मा स्म भवत् मा स्म भूत् लिङ्निमित्ते लृङ् क्रियातिपत्तौ हेतु
हेतुमद्भावादि लिङ्निमित्तं तत्र भविष्यत्यर्थे लृङ् क्रियाया अनिष्पत्तौ गम्यमानायां अभविष्यत् अभ
विष्यतां अभविष्यत् अभविष्यः अभविष्यतं अभविष्यत अभविष्यं अभविष्याव अभविष्याम स्तू

ष्टिः स्मेटभविष्यन्नदासुखमित्यभविष्यत् इत्यादिज्ञेयं अत सातत्यगमने अतति अत आदेः अभ्यासस्या
देरतोदीर्घः स्यात् आत आततुः आतुः आतिथ आतथुः आत आतिव आतिम अतिता अतिष्यति ।
ल॰ कौ॰ अततु आडजादीनां अजादेरंगस्याट् लङ्लुङ्लृङ्क्षु आतत् अतेत् अत्यात् अत्यास्तां लुङि सिचि इडाग
२२ मे कृते अस्तिसिचोऽपृक्ते विद्यमानात् सिचोऽस्तेश्च परस्यापृक्तस्य हल ईडागमः इट ईटि इटः परस्य सस्य लो
पः स्यादीटि सिज्लोप एकादेशे सिद्धो वाच्यः आतीत् आतिष्टां सिजभ्यस्तविदिभ्यश्च सिचोऽभ्यस्ताद्वि
देश्च परस्य ङित्संज्ञके झेर्जुस् आतिषुः आतीः आतिष्टं आतिष्ट आतिषं आतिष्व आतिष्म आतिष्यत्
षिध गत्यां पुगंतलघूपधस्य च पुगंतस्य लघूपधस्य चांगस्येको गुणः सार्वधातुकार्धधातुकयोः धात्वा
देः षः सः सेधति षत्वं सिषेध असंयोगाल्लिट् कित् असंयोगात्परोऽपिल्लिट् कित्स्यात् सिषिधतुः सिषिधुः रम
सिषेधिथ सिषिधथुः सिषिध सिषेध सिषिधिव सिषिधिम सेधिता सेधिष्यति सेधतु असेधत् से २२
धेत् सिध्यात् असेधीत् असेधिष्यत् एवं चिती संज्ञाने शुच शोके गद व्यक्तायां वाचि गदति नेर्गदनद

पतपदघुमास्यतिहंति यातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च उपसर्गस्थान्निमित्ता
त्परस्य नेर्णः गदादिषु परेषु प्रणिगदति ऊदोभ्युः अभ्यासकवर्गहकारयोश्चवर्गादेशः अतउपधायाः वृद्धि
स्यात् ञितिणिति च प्रत्यये जगाद जगद जगदिव जगदिम गदिता गदिष्यति गदतु अगदत् गदेत् गद्यात्
अतो हलादेर्लघोः हलादेर्लघोरकारस्य वृद्धिर्वेडादौ परस्मैपदे अगादीत् अगदीत् अगदिष्यत् णद अव्यक्ते शब्दे
णोनः धात्वादेर्णोनः णोपदेशास्त्वनर्द्दनाटिनाथ्नाधृनन्दनक्कनॄनृतः उपसर्गस्य समासेपि णोपदेशस्य उपसर्ग
स्थान्निमित्तात्परस्य णोपदेशधातोर्नस्य णः प्रणदति प्रणिनदति णिदि लिङ्गिमिश्रादेशादिकं न भवति पृष्टेग
तस्य यवयोः संयुक्त हलमध्यस्थस्याकारस्यैकारः स्यादेश्यासलोपश्च किति लिटि नेदतुः नेदुः थलि च सेटि
इटुति शलि चाशाक्ते स्यात् नेदिथ नेदथुः नेद ननाद ननद नेदिव नेदिम नदिता नदिता नदिष्यति
नदतु अनदत् नदेत् नद्यात् अनादीत् अनादीत् अनदीत् अनदिष्यत् टुनदि समृद्धौ आदिर्ञिटुडवः
उपदेशे धातोराद्या एते इतः स्युः इदितो नुम् धातोः नंदति ननंद नंदिता नंदिष्यति नंदतु अनंदत् इदिता

नलोपो न नंद्यात् अनंदीत् अनंदिष्यत् एवं वदि अभिवादनस्तुत्योः भदि कल्याणे सुखे च मदि स्तुतिमोदमदस्व
प्नकांतिगतिषु अर्च पूजायां अर्चति तस्मान्नुड्द्विहलः द्विहल्धातोर्दीर्घीभूतादचः परस्य नुट् स्यात् आनर्च आ
ल नर्चतुः अर्चिता अर्चिष्यति अर्चतु आर्चत् अर्चेत् अर्च्यात् आर्चीत् आर्चिष्यति अर्चतु आर्चत् अर्चेत् अर्च्या
कौ त् आर्चीत् आर्चिष्यत् व्रज व्रज गतौ व्रजति वव्राज व्रजिता व्रजिष्यति व्रजतु अव्रजत् व्रजेत् व्रज्यात्।
२३ वदव्रजहलंतस्याचः एषामचो वृद्धिः सिचि परस्मैपदेषु अव्राजीत् अव्रजिष्यत् कट वर्षावरणयोः कटति चका
ट कटिता कटिष्यति कटतु अकटत् कटेत् कट्यात् ह्म्यंतक्षणश्वसजागृणिश्व्येदितां ह्मयांतस्य क्षणादेर्ण्ये
दंतस्य श्वयतेरेदितश्च वृद्धिर्नेडादौ सिचि अकटीत् अकटिष्यत् गुपू रक्षणे गुपूधूपविच्छिपणिपनिभ्यः आ
यः स्वार्थे सनाद्यंता धातवः सनादयः कमेर्णिङ् तः प्रत्यया अंते येषां ते धातुसंज्ञकाः स्युः धातुत्वाल्लडादयः गोपा राम.
यति आयादय आर्धधातुके वा आर्धधातुकविवक्षायामायादयो वा स्युः कासप्रत्ययादाममंत्रे लिटि २३
कास्धातोः प्रत्ययान्तानां च आम् स्यादनेनैवं अतो लोपः आर्धधातुके उपदेशे यदंतं तस्य लोपः आर्धधातुके आमः आ

मः परस्मैलक् क्रम्यान मधुज्ये तेलिटि आमेताहितृ पराक्रम्यस्तयोन मधुज्येते तेषांद्वित्वादि उरत् अभ्या
सऋतोऽनजिणौनीति वृद्धिः गोपायांचकार द्वित्वान्तरत्वाद्याणिप्राप्ते द्विर्वचनेऽचि द्वित्वनिमित्तेऽचिअभ्या
देशेणद्वित्वेकर्तव्ये गोपायांचक्रतुः गोपायांचक्रुः एकाचउपदेशेऽनुदात्तात् उपदेशेयोधातुरेकाजनु
दात्तश्चततआर्द्धधातुकस्येडन ऊद्दंतैर्योतिरुक्ष्णुशीस्नुनुक्षुश्विडीङ्श्रिभिः वृङ्वृञ्भ्यांचेविनैकाचोऽजंतेषु
निहताः स्मृताः कांतेषु शक्लैकः चांतेषु पंच मुचरिचवचविचसिचषट् छांतेषुप्रच्छेकः जांतेषु त्यजनि
जिभज्भंजभुजभ्रस्जः मस्जयजयुजरुजरंजविजिरस्वंजसंजसृजः पंचदश दांतेषु अद्क्षुद्खिद्छिद्तुद
नुदपद्यभिद्विद्यविनद्विद्शद्सद्स्विद्यस्कंदहदः षोडश धांतेषु क्रुधक्षुधबुधबंधयुधरुधराधव्य
धशुधसाधसिध्यायेकादश नांतेषु मन्यहनौ द्वौ पांतेषु आपछिपतपतिपतृपदृपलिपलुपवपशप
स्वपसृपयोदश भांतेषुयभरभलभस्त्रयः मांतेषु गमनमयमरमश्चत्वारः शांतेषु क्रुशदंशदिशदृशमृशरि
शरुशलिशविशस्पृशोदश षांतेषु कृषत्विषतुषद्विषदुषपुष्यविषशिषशुषश्लिष्यएकादश सांतेषु

लं. कौ. २८

घुसवसंज्ञौ ॥ हलोनेषुहदिदुदूनदूमिदूहदूलिदूवदीदृौ अनुदात्ताहलंतेषुधातवस्त्वार्धधातुकेधाने गोपायांचकार्थ गो
पायांचक्र गोपायांचकार गोपायांचकृव: गोपायांचकृम: गोपायांबभूव गोपायांमास जुगोप जुगुपतु: जुगुपु:
स्वरतिसूतिसूयतिधूञूदितोवा स्वरत्यादेरूदितश्चपरस्यवलादेरार्धधातुकस्येड्वा जुगोपिथ जुगो गोपायिता गो
पिता गोप्ता गोपायिष्यति गोपिष्यति गोप्स्यति गोपायतु अगोपायत् गोपायेत् गोपाय्यात् गुप्यात् अगोपायी
त् नेटि हलादेरिड्वि हलंतलक्षणावृद्धिर्न अगोपीत् अगौप्सीत् झलोझलि झल: परस्यसस्यलोपोझलि अ
गौप्तां अगौप्सु: अगौप्सी: अगौप्त अगौप्त अगौप्सं अगौप्स्व अगौप्स्म अगोपायिष्यत् अगोपिष्यत् अगो
प्स्यत् क्षितक्षये क्षयति चिक्षाय चिक्षियतु: चिक्षियु: एकाचइतिनिषेधप्राप्ते कृसृभृवृस्तुद्रुस्रुश्रुवोलिटि: क्रादि
भ्यएवलिटोस्थानस्यादन्यस्मादनिटोपिस्यात् अचस्तास्वत्थल्यनिटोनित्यं उपदेशेऽजन्तोयोधातुस्तासौनित्यानिट्तत
स्थपस्मान उपदेशेऽत्वत: उपदेशेऽकारवतस्तासौनित्यानिट: परस्यथलइट्न ऋतोभारद्वाजस्य तासौनित्यानिटऋदंतादे एम
वथलोनेट्भारद्वाजमते तेनान्यस्यस्यादेव चिक्षयिथ चिक्षेथ चिक्षियथु: चिक्षिय चिक्षाय चिक्षय चिक्षियि २८

वः विविदिषिमः देता देष्यति दयतु अदयत् दयेत् अकृत्सार्वधातुकयोर्दीर्घः अजंतांगस्य दीर्घः स्याद्या
दौ प्रत्यये न तु कृत्सार्वधातुकयोः दीयात् सिचि वृद्धिः परस्मैपदेषु अजंतस्य वृद्धिः परस्मैपदे सिचि अदैषीत्
अदेष्यत् तप संतापे तपति तेपतुः तेपिथ तेतप्थ तप्ता तप्स्यति तपतु अतपत् तपेत् तप्यात् अता
प्सीत् अताप्तां अतप्स्यत् क्रमु पादविक्षेपे वा भ्राश भ्लाश भ्रमु क्रमु क्लमि त्रुटि लषः यः श्यन्वा कर्त्तरि सा
र्वधातुके परस्मैपदेषु क्रमः परस्मैपदेषु क्रमे दीर्घः परस्मैपदे शिति क्राम्यति क्रामति चक्राम क्रमिता क्रमि
ष्यति क्राम्यतु क्रामतु अक्राम्यत् अक्रामत् क्राम्येत् क्रामेत् क्रम्यात् अक्रमीत् अक्रमिष्यत् अक्रमिष्यत्
पा पाने पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः पादी
नां पिबादयः स्युरिति संज्ञक शकारादौ प्रत्यये पिबादेशादंतस्तेन न गुणः पिबति अतडौ णलः पपौ मनोलोपश्च इटि
च अजाद्योरार्द्धधातुकयोः क्ङिदितोः परयोरातो लोपः पपतुः पपुः पपिथ पपाथ पपथुः पप पपौ पपिव
पाता पास्यति पिबतु अपिबत् पिबेत् पर्लिङि घुसंज्ञानां मास्थागापिबतिजहातिस्यतीनां च एत्वं स्यादार्द्धधातुके लिङि कि

ति येयात् गातिस्थेतिसिचो लुक् अगात् अगातां अगुः सिज्लुकि आदंतादेव केन्नुस उस्य पदांतात् अपदांताद्का
ल॰ राडुसि परे पररूपमेकादेशः अगुः अगासत् ग्लै म्लै हर्षक्षये ग्लायति आदेच उपदेशेऽशिति उपदेशे एजंतस्य धातो
कौ॰ रात्वं न तु शिति जग्लौ ग्लाता ग्लास्यति ग्लायतु अग्लायत् ग्लायेत् वान्यस्य संयोगादेः घुमास्थादेरन्यस्य संयो
२५ गादेर्धातोरात एत्वं वा आर्द्धधातुके किति लिङि ग्लेयात् ग्लायात् यमरमनमातां सक् च एषां सगेभ्यः सिच इट् परस्मै
पदेषु अग्लासीत् अग्लास्यत् ह्वृ कौटिल्ये ह्वरति ऋतश्च संयोगादेर्गुणः ऋदंतस्य संयोगादेरंगस्य गुणो लिटि उप
धाया वृद्धिः जह्वार जह्वरतुः जह्वर्थ जह्वरथुः जह्वर जह्वरिव जह्वरिम ह्वर्ता ऋद्धनोः स्ये ऋतो हंतेश्च परस्य स्यस्य इट्
ह्वरिष्यति ह्वरतु अह्वरत् ह्वरेत् गुणोऽर्तिसंयोगाद्योः अर्त्तेः संयोगादेर्ऋदंतस्य च गुणः स्यात् यकि यादावार्द्धधातुके लि
ङि च ह्वर्यात् अह्वार्षीत् अह्वरिष्यत् श्रु श्रवणे श्रुवः शृ च श्रुवः शृ आदेशः श्नु प्रत्ययश्च कर्त्तरि सार्वधातुके परे
शृणोति सार्वधातुकमपित् अपित्सार्वधातुकं ङित् स्यात् शृणुतः हुश्नुवोः सार्वधातुके हुश्नुवोरनेकाचोऽस
स्यासंयोगपूर्वोवर्णस्य यण् स्यादचि सार्वधातुके शृण्वंति शृणोषि शृणुथः शृणुथ शृणोमि लोपश्चास्या

म्वो असंयोगपूर्वस्य प्रत्ययोकारस्य लोपो वा म्वोः परयोः शृण्वः शृणुवः शृण्मः शृणुमः शुश्राव शुश्रुवतुः
शुश्रुवुः शुश्रोथ शुश्रुवथुः शुश्रुव शुश्राव शुश्रव शुश्रुम श्रोता श्रोष्यति शृणोतु शृणुतात् शृणुतां
शृण्वंतु उतश्च प्रत्ययादसंयोगपूर्वात् असंयोगपूर्वात् प्रत्ययोतो हेर्लुक् शृणु शृणुतात् शृणुतं शृणुत
गुणावादेशौ शृणवानि शृणवाव शृणवाम अशृणोत् अशृणुतां अशृण्वन् अशृणोः अशृ
णुतं अशृणुत अशृणवं अशृण्व अशृणुव अशृण्म अशृणुम शृणुयात् शृणुयातां शृणुयुः
शृणुयाः शृणुयातं शृणुयात अश्रौषीत् अश्रोष्यत् गम्लृ गतौ इषुगमियमां छः शिति गच्छति जगाम गमह
नजनखनघसां लोपः क्ङित्यनङि। एषामुपधाया लोपोऽजादौ क्ङिति नित्वनङि। जग्मतुः जग्मुः जगमिथ जगंथ ज
ग्मथुः जग्म जगाम जगम जग्मिव जग्मिम गंता गमेरिट् परस्मैपदेषु गमेः सादेशाद्धातुकस्येट् परस्मैपदेषु
गमिष्यति गच्छतु अगच्छत् गच्छेत् गम्यात् पुषादिद्युताद्युदितः परस्मैपदेषु सपञ्चिकरणपुषादेर्घेनादेर्लृदि
तश्चपरस्य च्लेरङ् परस्मैपदेषु अगमत् अगमिष्यत् इति परस्मैपदप्रक्रिया एधवृद्धौ इति आत्मनेपदानां टेरे

ल॰ कौ॰ २९

ङितो लस्यात्मनेपदानां टेरेत्वं पयते आतो ङितः अतः परस्य ङि-मातां तऽयम् पयेते पयन्ते थासः से ङितो लस्य पयसे
पयेथे पयध्वे पये पयावहे पयामहे इजादेश्च गुरुमतोनृच्छः इजादिर्यो धातुर्गुरुमान् ऋच्छत्यन्यस्तत आम् स्याल्लि
टि आम प्रत्ययवत्कृञोनुप्रयोगस्य आम्प्रकृत्या तुल्यमनुप्रयुज्यमानात्कृञोप्यात्मनेपदं लिटस्तझयोरेशिरेच्
लिडादेशयोस्तझयोरेशिरेचौ स्तः एकस्योच्चारणं ज्ञापकं तत्र आदेशानां टेरेत्वं नेति तेन डारौरसः न पयांचक्रे पयांचक्रा
ते पयांचक्रिरे पयांचकृषे पयांचक्राथे इणः षीध्वंलुङ्लिटां धोंगात् इणन्तादंगात्परेषां षीध्वंलुङ्लिटां धस्य ढः पयांच
कृढ्वे पयांचक्रे पयांचकृवहे पयांचकृमहे पयांबभूव पयामास पयिता पयितारौ पयितारः पयितासे पयितासा
थे धि च धादेशे सस्य लोपः पयिताध्वे ह एति तासस्त्योः सस्य हः पयिताहे पयितास्वहे पयितास्महे पयिष्यते
पयिष्येते पयिष्यन्ते पयिष्यसे पयिष्येथे पयिष्यध्वे पयिष्ये पयिष्यावहे पयिष्यामहे आमेतः लोटः एतआ
म् पयतां पयेतां पयन्तां सवाभ्यां वामौ सवाभ्यां परस्य लोडेतः क्रमाद्वामौ स्तः पयस्व पयेथां पयध्वं पतयै लो
ट् उत्तमस्य पयै पयावहै पयामहै आस्थ पेयत पयेतां पयन्त पयथाः पयेथां पयध्वं पये पयावहि पयामहि

राम २९

हि लिङः सीयुट् सलोपः पयेत पयेयातां झस्य रन् लिङः पयेरन् पयेथाः पयेयाथां पयेध्वं इटोऽत् लि
ङादेशस्य पयेय पयेवहि पयेमहि सुट्तिथोः लिङः सलोपः सुट् यलोपः पयिषीष्ट पयिषीयास्तां पयिषीष्ठाः
पयिषीयास्थां पयिषीध्वं पयिषीय पयिषीवहि पयिषीमहि पेयिष्ट पेयिषातां आत्मनेपदेष्वनतः अन
कारान्तस्मात्मनेपदेषु झस्य अत् स्यात् पेयिषत अनकारान्तस्य पेयिष्ठाः पेयिषाथां पेयिढ्वं पेयि
ध्वे पेयिष्वहि पेयिष्महि पेयिष्यत पेयिष्येतां पेयिष्यन्त पेयिष्येथां पेयिष्यध्वं पेयिष्ये पेयिष्यावहि पे
यिष्यामहि कमु कान्तौ कमेर्णिङ् स्वार्थे कामयते अयामन्ताल्वाय्येत्न्विष्णुषु णेरय कामयाञ्चक्रे आयादयः
इति वा चकमे चकमाते चकमिरे चकमिषे चकमाथे चकमिध्वे चकमे चकमिवहे चकमिमहे कामयिता
हे कमितासे कामयिष्यते कमिष्यते कामयतां अकामयत कामयिषीष्ट कमिषीष्ट णिश्रिद्रुस्रुभ्यः कर्तरि
चङः णेर्नाप् आदिभ्यश्च च्लेश्चङ् कर्त्रर्थे लुङि कामि अत इति स्थिते णेरनिटि अनिदादावार्द्धधातुके परे णेर्लो
पः णौ चङ्युपधाया ह्रस्वः चङ् परे णौ यदङ्गं तस्योपधाया ह्रस्वः चङि चङि परे अनभ्यासस्य धात्ववयवस्यैका

वः प्रथमस्य हेः लः जादेशः द्वितीयस्य सन्वल्लघुनि चङ्परेऽनग्लोपे चङ्परे णौ यदङ्गं तस्य योऽभ्यासो लघुप
रः तस्य सनीव कार्यं स्यात् णावग्लोपेऽसति सन्वतः अभ्यासस्य इत्त्वं स्यात् इति दीर्घो लघोः लघोरभ्यासस्य
दीर्घः सन्वद्भावविषये अचीकमत णिङभावपक्षे कमेश्च्लेश्चङ् वाच्यः अचकमत अकामयिष्यत
अकमिष्यत अय गतौ अयते उपसर्गस्यायतौ अयतावुपसर्गरेफस्य लत्वं प्लायते पलायते पला
यते दयायासश्च प्रभ्पः आम्लिटि अयांचक्रे अयिता अयिष्यते अयतां आयत अयेत अयिषीष्ट
विभाषेटः इणः परो य इट् ततः परेषां षीध्वं लुङ्लिटां धस्य वा ढः अयिषीढ्वं अयिषीध्वं आयिष्ट आ
यिढ्वं आयिध्वं आयिष्यत द्युत दीप्तौ द्योतते द्युतिस्वाप्योः संप्रसारणं अभ्यासस्य दिद्युते द्योतिता
द्योतिष्यते द्योततां अद्योतत द्योतेत द्योतिषीष्ट द्युद्भ्यो लुङि द्युतादिभ्यः परस्मैपदं वा लुङि पुषादि
त्वङ् अद्युतत् अद्योतिष्ट अद्योतिष्यत एवं श्विता वर्णे ञिमिदा स्नेहने ञिक्ष्विदा स्नेहनमोचनयोः मोहनयोरित्ये राम॰
के ञिक्ष्विदा चेत्येके रुच दीप्तावभिप्रीतौ च घुट परिवर्तने शुभ दीप्तौ क्षुभ संचलने णभ तुभ हिंसा २२

तो स्रंसु ध्वंसु भ्रंसु अवस्रंसने ध्वंसु गतौ च स्रंभु विश्वासे वृतु वर्तने वर्तते ववृते वर्तिता वृद्भ्यः स्यस
नोः वृतादिभ्यः पंचभ्यो वा परस्मैपदं स्यात् स्ये सनि च न वृद्भ्यश्चतुर्भ्यः वृतु वृधु शृधु स्यंदूभ्यः सादेर्गइथा
तुकस्येड् न तङानयोरभावे वर्त्स्यति वर्तिष्यते वर्तताम् अवर्तत वर्तेत वर्तिषीष्ट अवृतत् अवर्ति
ष्ट अवर्त्स्यत् अवर्तिष्यत दद दाने ददते न शसददवादिगुणानां शसेर्ददेर्वकारादीनां गुणशब्देन वि
हितो योऽत् तस्य एत्वाभ्यासलोपौ न दददे ददाते ददिरे ददिता ददिष्यते ददतां अददत ददेत
ददिषीष्ट अददिष्ट अददिष्यत त्रपूष लज्जायां त्रपते तॄफलभजत्रपश्च एत्वमभ्यासलो
पश्च किति लिटि सेटि थलि च त्रेपे त्रपिता त्रप्ता त्रपिष्यते त्रप्स्यते त्रपतां अत्रपत इत्यात्मनेपद
प्रक्रिया श्रिञ् सेवायां श्रयति श्रयते शिश्राय शिश्रिये श्रयितासि श्रयितासे श्रयिष्यति श्रयिष्यते
श्रयतु श्रयतां अश्रयत् अश्रयत श्रयेत् श्रयेत श्रीयात् श्रयिषीष्ट चङ् अशिश्रियत् अशिश्रियि

ल० कौ० ५८

ष्यत् अभरिष्यत् भृञ् भरणे भरति भरते बभार बभ्रतुः बभ्रुः बभर्थ बभृव बभृम बभ्रे बभृषे भर्तासि
भर्तासे रिङ् शयग्लिङ्क्षु शे यकि यादावार्द्धधातुके लिङि ऋतो रिङ् रिङि प्रकृते रीङ् विधिसामर्थ्यात् दीर्घो न भ्रि
यात् उश्च ऋवर्णान्परौ झलादी लिङ् आत्मनेपदपरसिचेत्येतौ कितौ स्तः भृषीष्ट भृषीयास्तां अभा
र्षीत् ह्रस्वादङ्गात् सिचो लोपो झलि अभृत अभरिष्यत् हृञ् हरणे हरति हरते जहार जह
र्थ जह्रिव जह्रे जह्रिषे हर्ता हरिष्यति धृञ् धारणे धरति धरते णीञ् प्रापणे नयति नयते डु
पचष् पाके पचति पचते पालकौयाच्च पेचिथ पपक्थ पेचे पक्ता भज सेवायां भजति भजते
भेजे भक्ता भक्ष्यति भक्ष्यते अभाक्षीत् अभक्त अभक्षातां यज देवपूजासंगतिकरणदानेषु यज
ति यजते लिट्यभ्यासस्योभयेषां वच्यादीनां ग्रह्यादीनां चाभ्यासस्य संप्रसारणं लिटि इयाज वचिस्वप्या
यजादीनां किति वचिस्वप्योर्यजादीनां च संप्रसारणं किति ईजतुः ईजुः इयजिथ इयष्ठ यक्ष्यति य

क्ष्यति वक्ष्यते उह्यात् वक्षीष्ट अवाक्षीत् अवाक्षीत् अवोढ वह प्रापणे वहति वहते उवाह ऊहुः उ
वहिथ ऊषषत्वे ढोढे धः नतुदधाते ढोढेलोपः सहिवहोरोदवर्णस्य ढलोपे उवोढ ऊहे वोढा वक्ष्यति
अवाक्षीत् अवोढां अवाक्षुः अवाक्षीः अवोढं अवोढ अवाक्षं अवाक्ष्व अवोढ अवक्षातां अवक्षत
अवोढाः अवक्षाथां अवोढ्वं अवक्षि अवक्ष्वहि इतिभ्वादिः अदभक्षणे अदिप्रभृतिभ्यः शपः लु
क्स्यात् अत्ति अत्तः अदंति अत्सि अत्थः अत्थ अद्मि अद्वः अद्मः लिट्यन्यतरस्यां आदेशघस्लृवा
स्यात् जघास उपधायालोपः घसचले शासिवसि घसीनां च इण्कुभ्यामेषां षत्वं जक्षतुः
जक्षुः जघसिथ आद आदतुः आदुः इडत्यर्तिव्ययतीनां अदजक्षोरन्यत्र भस्येलोनित्यमिट आदिथ
अत्ता अत्स्यति अत्तु अद्यात् अत्तां अदंतु हुझल्भ्यो हेर्धिः अद्धि अद्यात अत्तं अत्त अदानि अदाव अ
दाम अदः सर्वेषां अदोऽपृक्तसार्वधातुकेस्य अटस्यात् आदत् आत्तां आदन् आदः आत्तं आत्त आदं
आद्व आद्म अद्यात् अद्यातां अद्युः अद्यात्तां अद्यासुः लुङ्सनोर्घस्लृ अदः अड् अघसत् आत्स्यत्

ल॰ कौ॰ २९

हनहिंसागत्योः हंति अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपोझलिक्ङिति अनुनासिकांताना
मेषांलोपः यमिरमि नमिगमिहनिमन्यत योनुदात्तोपदेशः ननुत्त एउत्ति एउक्र एउन्त एउत्तु एउवनु मनु
नतोन्यादयः हतः घ्नंति हंसि हथः हथ हन्मि वमोर्वा उपसर्गस्थान्निमित्तादनेय जघंथ जघ्नथुः
जघ्न जघान जघन जघ्निव जघ्निम हंता हनिष्यति हंतु हतात् हतो ग्रहजेर्जः हौ असिद्धवदत्राभा
त् अतऊर्द्धमापादपरिसमाप्तेराभीयंसमानाश्रयेतस्मिन्कर्तव्येतदसिद्धं इतिजस्यासिद्धत्वान्नहे
र्लुक जहि हतात् हतं हनानि हनाव हनाम अहन् अहतां अघ्नन् अहन् अहतं अहत अ
हनं अहन्व अहन्म अहन्यात् आर्द्धधातुकइत्यधिकृत्य हनोवधलिङि लुङि च वध्यात् वध्यास्तां
अवधीत् अहनिष्यत् यामिश्रणामिश्रणयोः उतोवृद्धिर्लुकिहलि लुग्विषयेउतोवृद्धिःपितिह
लादौसार्वधातुके नत्वभ्यस्तस्यौति युतः युवंति यौषि युथः युथ यौमि युवः युमः युयाव
यविता यविष्यति यौतु युतात् अयौत् अयुतां अयुवन् युयात् इहउतोवृद्धिर्न भाष्येपिच्चङि

त्वीः चोपिन्ने निष्याख्यानात् युयातां युयुः स्यात् सूयास्तां स्यासुः अयावीत् अयविष्टत् यामायाण
याति यातः यांति ययौ याता यास्यति यातु अयात् लङः शाकटायनस्यैव आदंताल्लङोजुस्वा अयुः
अयान् यायात् यायातां यायुः यायात् यायास्तां यायासुः एवंवातिगंधनयो भादीप्तौ स्नाशौचे श्राृपाके
द्राकुत्सायांगतौच प्साभक्षणे पारक्षणे रादाने लाआदाने दाप्लवणे ख्याप्रकथने अयंसार्वधातुके प्र
वप्रयोक्तव्यः विदज्ञाने विदोलटोवावेत्तेर्लेटः परस्मैपदानांणलादयोवा वेद विदतुः विदुः वेत्थविदथुः
विद वेद विद्व विद्म पक्षेवेत्ति वित्तः विदंति उषविदजागृभ्योन्यतरस्यां पक्षेलिट्याम्वा विदेरदंतत्व
प्रतिज्ञानादामिनगुणः विदांचकार विवेद वेदिता वेदिष्यति विदांकुर्वन्त्वित्यन्यतरस्यां वेत्तेर्लोट्यामसगु
णाभावोलोटोलुक् लोडंतकरोत्यनुप्रयोगस्यवानियान्यते पुरुषवचनेनविवृत्तिने विदांकरोतु तनादि
कृञउपरः शयोऽपवादः अतोसार्वधातुके उप्रत्ययांतकृञोतुउत्सार्वधातुकेङ्किति विदांकुरुतात् विदां
कुरुतांविदांकुर्वंतु विदांकुरु विदांकरवाणि अवेत् अविक्तां अविदुः दस्य धातोर्दस्यपदांतस्यसिपिरु

ल
कौ
३०

वां अवेः अवेत् वियात् वियास्तां अवेदीत् अवेदिष्यत् असभूवि अस्ति उपसर्गप्रादुर्भ्यामस्तिर्यच्परः
उपसर्गेण प्रादुसश्च अस्तेः सस्य षः यकारेऽचि च परे निष्यात् प्रादुःष्यात् निषंति प्रादुर्ष्यंति यच्परः
किं अभिसन्तः श्नसोरल्लोपः अस्माल्लेश्यानोलोपः सार्वधातुके क्ङिति लः सति अस्ति सः स्थ अस्मि स्वः
स्मः असेर्भूः आर्द्धधातुके बभूव भविता भविष्यति अस्तु स्तात् स्तां संतु घ्वसोरेद्धावभ्यासलोपश्च
घोरेत्वे एत्वं स्यात् हौ अभ्यासलोपश्च आभीयत्वान्नेद्धि एधि स्तात् स्तं स्त असानि असाव असाम
आसीत् आस्तां आसन् स्यात् स्यातां स्युः भूयात् अभूत् अभविष्यत् इणगतौ एति इतः इणो
यण् अजादौ प्रत्यये यन्ति अभ्यासस्यासवर्णे अभ्यासस्य इउवर्णयोरियङुवङौ स्तोऽसवर्णेऽचि इ
याय दीर्घ इणः किति इणोऽभ्यासस्य दीर्घः कितिलिटि ईयतुः ईयुः इययिथ इयेथ ऐत् ऐतां आ
यन् इयात् ईयात् एतेर्लिङि उपसर्गात्परस्य इणोऽणो ह्रस्वस्य आर्द्धधातुके किति लिङि निरियात् अ
नादेवच्च यायमेकादेशः अपूर्वस्यांतवत् परस्यादिवद्भयतेनाश्रयणेनांतादिवत् अभीयात् अणः

३०

किसमेयात इणोगालुङि गातिस्थेतिसिचोलुक् अगात् अगातां अगुः ऐष्यत् शीङ्स्वप्ने शीङः सार्व
धातुके गुणः शेते शयाते शीङोरुट् आदेशस्यातः शेरते शेषे शयाथे शेध्वे शये शेवहे शेमहे शि
श्ये शयिता शयिष्यते शेतां अशेत अशयातां अशेरत शयीत शयीयातां शयीरन् शयिषीष्ट अ
शयिष्ट अशयिष्यत इङ् अध्ययने इङिकावध्युपसर्गंनोनव्यभिचरतः अधीते अधीयाते अधीयते
गाङ्लिटि इङः अधिजगे अध्येता अध्येष्यते अधीतां अधीस्व अधीयाथां अधीध्वं अध्यये अध्ययाव
है अध्ययामहै अध्यैत अध्यैयातां अध्यैत अध्यैथाः अध्यैयाथां अध्यैध्वं अध्यैयि अध्यैवहि अ
ध्यैमहि अधीयीत अधीयीयातां अध्येषीष्ट विभाषालुङ्लृङोः इङो गाङ् गाङ्कुटादिभ्योऽञ्णिन्ङित्
गाङादेशात्कुटादिभ्यश्चाञ्णितः प्रत्ययाः ङितः स्युः घुमास्थागापाजहातिसांहलि एत्वामात ईत्स्याद्ध
लादौ ङिति आर्द्धधातुके अध्यगीष्ट अध्येष्ट अध्यगीष्यत अध्येष्यत दुह प्रपूरणे दोग्धि दुग्धः दु
हंति एकाचोवशोभष्झषंतस्यसध्वोः धोक्ष्यति दुग्धे दुहाते धुक्षे दुहाथे धुग्ध्वे दुहे दुह्वहे दुह्महे

ल॰ कौ॰ ३१

दोग्धा धोक्ष्यति धोक्ष्यते दोग्धु दुग्धात् दुग्धां दुहन्तु दुग्धि दुग्धात् दुग्धं दुग्ध दोहानि दुग्धां दु
हातां दुहतां दुहतां धुक्ष्व दुहाथां धुग्ध्वं दोहै दोहावहै अधोक् अदुग्धां अदुहन् अदोह् अदुग्ध
अदुहातां अदुहत अदुग्धाः दुह्यात् दुहीत धुक्षीष्ट शल इगुपधादनिटः क्सः इगुपधाय शलंत
त्तस्मादनिटः च्लेः क्सादेशः लिङ्सिचावात्मनेपदेषु इकोमीपाद् हलः परौ झलादी लिङ्सिचौ कितौ
लडिःस्कोरितिकलोपे अधुक्षत लुग्वा दुहदिहलिहगुहामात्मनेपदे दंत्ये एषां क्सस्य लुग्वा दंत्ये त
ङि अधुक्षत अदुग्ध क्सस्याचि अजादौ तङि क्सस्य लोपः अधुक्षातां अधुक्षंत अधुक्षथाः अदु
ग्धाः अदुक्षाथां अधुग्ध्वं अधुक्षध्वं अधुक्षि अधुक्षावहि अदुह्वहि अधुक्षामहि अधोक्ष्यत
अधोक्ष्यत एवं दिह उपचये लिह आस्वादने लेढि लीढः लिहंति लेक्षि लीढे लिहाते लिहते
लिक्षे लिहाथे लीढ्वे लीढ लीढात् लीढां लिहंतु लिढि लेहानि लीढां अलेट् अलीढ् इत्यदा
लोयांगादि ब्रुवः पंचानामादित आहो ब्रुवः ब्रुवो लटस्तिबादीनां पंचानां णलादयः पंच वा स्युर्

वञ्चाहादेशः आह आहतुः आहुः आहस्थ झलि चर्त्वे आत्थ आहथुः ब्रुव ईट् ब्रुवो हलादे पित ईट् ब्रवी
ति ब्रूतः ब्रुवन्ति ब्रूते ब्रुवाते ब्रुवोवचि आर्द्धधातुके उवाच ऊचतुः ऊचुः उवचिथ उवक्थ ऊचे ऊक्ता वक्ष्यति
वक्ष्यते ब्रवीतु ब्रूतात् ब्रूतां ब्रूहि ब्रवाणि ब्रूतां ब्रवै अब्रवीत् अब्रूत ब्रूयात् ब्रुवीत उच्यात् वक्षीष्ट अस
तिवक्तिख्यात्यङ् वचउम् अङिपरे अवोचत् अवोचत अवक्ष्यत् अवक्ष्यत चर्करीतेच चर्करीतमितियङ्लु
गंतंतददादौवोध्यं ऊर्णुञ् आच्छादने ऊर्णोतेर्विभाषा वृद्धिर्हलादौपितिसार्वधातुके ऊर्णौति ऊर्णोति
ऊर्णुतः ऊर्णुवंति ऊर्णुते ऊर्णुवाते ऊर्णुवते ऊर्णोतेराम्नेतिवाच्यं नन्द्राः संयोगादयः अचःपराः सं
योगादयोनदराद्विर्नभवंति नुशब्दस्यद्वित्वं ऊर्णुनुवतु विभाषोर्णोः इडादिप्रत्ययो ङित्स्यात् ऊर्णु
नुविथ ऊर्णुनविथ ऊर्णविता ऊर्णुविता ऊर्णोतु ऊर्णवानि ऊर्णवै गुणोपृक्ते ऊर्णोतेर्गुणोहलादौपिति
सार्वधातुके और्णोः ऊर्णुयात् ऊर्णुयातां ऊर्णुयात् ऊर्णुयातां ऊर्णविषीष्ट ऊर्णुविषीष्ट और्णवीत्
ऊर्णुविष्टा ऊर्णोतेर्विभाषा इडादौपरस्मैपदेसिचिवृद्धिः पक्षेगुणः और्णावीत् और्णवीत् और्णुविष्यत्

ल
कौ·
३२

ओँ॥ विष्यत उत्सरादि हु दानादनयोः जुहोत्यादिभ्यः श्लुः शपः श्लौ धातोर्द्वेस्तः जुहोति जुहुतः अद
भ्यस्तात् उस्यश्नतायवादः हुश्नुवोरिति यण् जुह्वति भीह्रीभृहुवां श्लुवच्च आमोलिद्याम्भ्यासस्यादाभिश्लाविव
कार्यं च जुहवांचकार जुहाव होता होष्यति जुहोतु जहुतात् जुहुतां जुह्वतु जुहुधि जुहवानि अजु
होत् जुसिच उगंतागस्य गुणोऽजादौ जुसि अजुहवुः जुहुयात् हूयात् अहौषीत् अहोष्यत् ञिभीभ
ये बिभेति भियोऽन्यतरस्यां इः स्याद्धलादौ क्ङिति सार्वधातुके बिभीतः बिभितः बिभ्यति बिभयांचकार बि
भाय भेता भेष्यति बिभेतु बिभितात् बिभीयात् भीयात् अभेष्यत् ह्रीलज्जायां जिह्रीतः जिह्रियति
जिह्रयांचकार जिह्राय ह्रेता ह्रेष्यति जिह्रेतु अजिह्रेत् जिह्रियात् अह्रैषीत् अह्रेष्यत् पृ पालनपूरणयोः
अर्त्तिपिपर्त्योश्च अभ्यासस्य इः पिपर्त्ति उदोष्ठ्यपूर्वस्य अंगावयवोष्ठ्यपूर्वो य ऋत् तदंतस्यांगस्य उः हलि
च रेफवांतस्य धातोरुपधाया इको दीर्घो हलि पिपूर्तः पिपुरति पपार शृदृप्रां ह्रस्वो वा किति लिटि पप्रतु
पप्रुः ऋकृतंतो नोदादिक ऋके ऋधातो ऋतां च गुणो लिटि पपरतुः पपरुः ह्रस्वो वा ह्रु-ह्र भ्यास

देनो चेदीदीर्घो वा स्यान्नृतो लिटि पपिता परिष्यति परीष्यति पिपर्तु अपिपः अपिपर्तां अपिपरुः पिपूर्यात्
प्र्यात् अपारीत् सिचि च परस्मैपदेषु अत्र वृतोइटो न दीर्घः अपारिष्टां अपरिष्यत् अपरीष्यत् ओहाक्
त्यागे जहाति जहातेश्च इनस्य उत्वादौ क्ङिति सार्वधातुके जहितः ई हल्यघोः श्नाभ्यस्तयोरातः ई सार्व
धातुके क्ङिति हलि जहीतः नलुप्तसंज्ञानां श्नाभ्यस्तयोरातः लोपः क्ङिति सार्वधातुके जहति जहौ
हाता हास्यति जहातु जहितात् जहीतात् आ च हौ जहातेः आदिदीर्घौ जहाहि जहिहि जहीहि
अजहात् अजहुः लोपो यि जहातेरालोपो यकारादौ सार्वधातुके जह्यात् हेयात् अहासीत् अहास्यत्
माङ् माने शब्दे च भ्ञामित् भृञ्माङ् ओहाङ् एषामभ्यासस्येत्स्यात् मिमीते मिमाते मिमते
ममे माता मास्यते मिमीतां अमिमीत मिमीत मासीष्ट अमास्त अमास्यत ओहाङ् गतौ जिहीते
जिहाते जिहते जहे हाता हास्यते जिहीतां अजिहीत जिहीत हासीष्ट अहास्त अहास्यत डुभृञ्
धारणपोषणयोः बिभर्ति बिभृतः बिभ्रति बिभृते बिभ्राते बिभ्रते बिभरांचकार बभार बभर्थ ब

ल॰
कौ॰
६३

भृव विभरांचकार बभ्रे भर्त्ता भरिष्यति भरिष्यते विभर्त्तु विभराणि विभृतां अविभः अविभृत वि
भृयात् विभ्रीत भ्रियात् भृषीष्ट अभार्षीत् अभृत अभरिष्यत् अभरिष्यत डुदाञ्दाने ददाति दत्तः
ददति दत्ते ददाते ददते ददौ ददे दाता दास्यति ददातु दाधाघ्वदाप् दाङ्पाधाङ्घ्वा अधातवो घुसंज्ञास्युः
दाप्दैपौ विना घसोरित्यत्वं देहि दत्तां अददात् अदत्त दद्यात् ददीत दयात् दासीष्ट अदात् अदा
तां अदुः स्थाघ्वोरिच्च अनयोरिदंतादेशः स च किदात्मनेपदेषु अदित अदास्यत् अदास्यत
डुधाञ्धारणपोषणयोः दधाति दधस्तथोश्च द्विरुक्तस्य झषंतस्य धाञो बशो भष् तथयोः स्ध्वो
श्च परतः धत्तः दधति दधासि धत्थ धत्ते धत्से धेहि धद्ध्वं णिजिर् शौचपोषणयोः निजां त्र
याणां गुणः श्लौ निजविजविषां अभ्यासस्य गुणः श्लौ नेनेक्ति नेनिक्तः नेनिजति नेनेक्ते नि
नेज नेक्ता नेक्ष्यति नेक्ष्यते नेनेक्तु नेनिग्धि नाभ्यस्तस्याचि पिति सार्वधातुके लघूपधस्य गु
णः नेनिजानि नेनिक्तां अनेनेक् अनेनिक्तां अनेनिजुः अनेनिजं अनेनिक्त नेनिज्यात् नेनि

नीत निन्यात् निनीष्ट इरितेनाचा इरितेनाधातोस्मारङ्गापरस्मैपदेषु अनिजत अनैत्तीत् अनिन्नु अनेन्यात्
अनेन्यत इतिनुहोत्यादि दिवुक्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु दिवादि
भ्यः श्यन् कर्त्तरिसार्वधातुके श्यः ऽयवादः हलिचेतिदीर्घः दीव्यति दिदेव देविता देविष्यति दीव्य
तु अदीव्यत् दीव्येत् दीव्यात् अदेवीत् अदेविष्यत् एवंषिवुतन्तुसंताने षीव्यति त्ती गात्रविक्षेपे नृ
त्यति ननर्त नर्त्तितासे सिचिकृतचृतच्छृदतृदनृतः एभ्यः सिज्भिन्नस्य सादेशार्द्धधातुकस्येट् वा नर्त्ति
ष्यति नर्त्स्यति नृत्यतु ऽनृत्यत नृत्यात् अनर्त्तीत् ऽनर्त्तिसत त्रसीउद्वेगे वाभ्राशभ्लाशेति श्यन्वा त्रस्यति त्र
सति तत्रास वा जृभ्रमुत्रसां एषांकितिलिटिसेटि थलिचएत्वाभ्यासलोपौवा त्रेसतुः तत्रसतुः त्रेसिथ
त्रसिता त्रसिष्यति त्रस्यतु ऽत्रस्यत त्रसेत त्रस्यात् ऽत्रसीत् ऽत्रासीत् ऽत्रसीष्ट ऽत्रसीः ऽत्रसिष्यत शोतनूकरणे दो
तः श्यति लोपः श्यति श्यतः श्यंति शशौ शशतुः शाता शास्यति विभाषाघ्राधेट्शाच्छासः एभ्यः सिचोलु
ग्वापरस्मैपदेषु अदेच उपदेशशाशितिशातित्तेला ऽऽशासीत् अशात् अशाता अशुषुः इदमकायमर्द

ल॰ कौ॰
५६

मनश्मातांसन्तक् अशाशीत् अशशासीत् अशाशिषुंः शाशसत् कोकेऽदने काति धोतेकर्मणि स्यति सशौ दो
ऽवखंडने द्यति ददौ देयात् अदात् वधनाऽउते प्रहेन्मावपिच्याधिवाहिविविनिह च्यतिष्टकति॥ जनीना
ह्रिति नृपषोहं प्रसारणंस्यात् किंतिङि तिच विध्यति विव्याध विविधतुः व्यधतुः व्यध्यात् व्यद्धा व्यत्स्य
ति विधेत् विध्यात् अव्यात्सीत् पुष्य पुष्टौ पुष्यति पपोष पुपोष पुपोषिथ पोष्टा पोक्ष्यति षटोकःति
पुषादीत्यङ् अपुषत् शुष शोषणे शुष्यति शुशोष अशुषत् णश अदर्शने नश्यति ननाश नेश
तुः रधादिभ्यश्च रध नश तृप दृप द्रुह मुह ष्णुह ष्णिह एभ्योवलादेरार्धधातुकस्येड्वा नेशिथ मस्जिन
शोर्झलि नुम्स्यात् ननंष्ठ नेशिव नेशिम नशितानंष्टा नशिष्यति नंक्ष्यति नश्यतु नश्यत् नश्येत्
नश्यात् अनशत् षूङ् प्राणिप्रसवे सूयते सुषुवे क्रादिनियमादिट् छुकःकितिग्वियपकाचनेगेझाव
कितइपनसुषुविषे सु सोता सविता दूङ् परितापे दूयते दीङ् क्षये दीयते दीङो युडचि क्ङिति दीङः
परस्माजादेः क्ङित्यार्धधातुकस्य युट् उपदिदीयेचङुःयणोः सिद्धोवक्तव्यो दिदीये मीनातिमिनोतिदीङां

लपिच दक्षामास्ये लपिचादशोप्येत निमिन्ने दाता दासते अदाल डीङ् विहायसागतौ डीयते
पीङ् पाने पीयते माङ् माने मायते ममे जनीप्राडुर्भावेजाजनेनेनीपिति जायते जज्ञे जनिता ज
निष्यति ज्ञायतेनाऽज्ञाप्राडू टयंत दीपजनबुधपूरितापिपापिभ्योऽन्यतरस्यां पभ्यःशूपिरवाप
कवूचननेपूरे विपणातुक्क विपणःपरस्मैकस्मात् जनिवध्योश्च अनयानेहद्धिजिनितिणाति च अ
जनिअजनिष्टजनिष्यत दीपीदीप्तौ दीप्यते दिदीपेदीप्ताइदीपिष्यते अदीपि अदीपि अदीपिष्
पदगतौ पद्यते पेदे पत्ता पत्वेत पत्सीष्ट चिणतेपदः पदस्नेः विपोवयरे अपादि अपत्साता विदस
तायां विद्यते वेत्तांबुधअवगमने बुध्यते बोद्धाभोत्स्यते भुत्सीष्ट अबोधि अबुद्ध युधसंप्रहारे
युध्यते योद्धा अयुद्ध सृजविसर्गे सृज्यते ससृजे सृजिदृशोर्झल्यमकिति अनयोरमरूलागाव ।
किति स्रष्टा स्रक्ष्यते स्रक्षीष्ट असृष्ट असृक्षातां मृषतितिक्षायां मृष्यति मृष्यते ममर्ष ममृ
षिथ ममर्ष ममृषिषे मर्षितासि मर्षितासे मर्षिष्यति मर्षिष्यते णहबंधने नह्यति नह्यते

ल॰ कौ॰ ३५

ननाह नेहिथ नेहे नद्धा नत्स्यति अनात्सीत् अनद्ध इति दिवादयः षुञ् अभिषवे स्वादिभ्यः श्नुः श
पोपवादः सुनोति सुनुतः हुश्नुवोरिति यण् सुन्वन्ति सुन्वः सुनुवः सुनुते सुषाव सुषुवे सोता
सुनोतु सुनवानि सुनवै सुनुयात् सूयात् स्तुसुधूञ्भ्यः परस्मैपदेषु सिचः इट् असावीत्
असोष्ट चिञ् चयने चिनोति चिनुते विभाषा चेः अभ्यासाच्चेः कुत्वं स्यात् सनि लिटि च चिकाय चि
चाय चिक्ये चिच्ये अचैषीत् अचेष्ट स्तृञ् आच्छादने स्तृणोति स्तृणुते शर्पूर्वाः खयः अभ्यास
स्य शर्पूर्वाः खयः शिष्यन्ते अन्ये हलो लुप्यन्ते तस्तार तस्तरे गुणोर्तीति गुणः स्तर्यात् ऋतश्च
संयोगादेः ऋदन्तात् संयोगादेर्लिङ्सिचोरिड्वा तङि स्तरिषीष्ट स्तृषीष्ट अस्तरिष्ट अस्तृत धू
ञ् कंपने धुनोति धुनुते दुधाव दुधुवे अधौसीत् अधोष्ट धूञ् कम्पने धूनोति धूनुते धू
नुते स्वरतीति वेट् दुधविथ दुधोथ श्र्युकः किति श्रिञ् एकाच उगन्ताच्च गित्कितोरिण् न
ति प्राप्ते क्रादिनियमान्नित्यमिट् दुधविव अधावीत् अधविष्ट अधोष्ट इति स्वादयः तुद व्यथने

तुदादिभ्यः शः शपोपवादः तुदति तुदते तुतोद तुतोदिथ तुतुदे तोत्ता अतौत्सीत् णुद प्रेरणे नुदति
नुदते नुनोद नुनुदुः नुनुदे नोत्ता भ्रस्ज पाके ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां
क्ङितिपषां किति ङिति च संप्रसारणं स्यात् सस्य श्चुत्वेन शः शस्य जश्त्वेन जः भृज्जति भृज्जते भ्रस्जो
रोपधयोरमन्यतरस्यां भ्रस्जेः रेफस्योपधायाश्च स्थाने रमागमो वार्द्धधातुके मित्वादन्त्यादचः परः स्थाने षष्ठी
निर्देशाद्रोपधयोर्निवृत्तिः बभर्ज बभर्जतुः बभर्जिथ बभ्रज्ज बभ्रज्जतुः स्कोरिति सलोपः व्रश्चेति षः
बभ्रष्ठ बभर्ज्जे बभ्रज्जे भर्ष्टा भ्रष्टा भर्क्ष्यति क्ङिति रमागमं बाधित्वा संप्रसारणं पूर्वविप्रतिषेधेन भृ
ज्ज्यात् भृज्ज्यास्तां भृज्ज्यासुः भर्क्षीष्ट भ्रक्षीष्ट अभार्क्षीत् अभ्राक्षीत् अभर्ष्ट अभ्रष्ट कृष विलेखने
कृषति कृषते चकर्ष चकृषे अनुदात्तस्य चर्दुपधस्यान्यतरस्यां उपदेशेऽनुदात्तो य ऋदुपधस्तस्य अम्वा
झलादावकिति क्रष्टा कर्ष्टा कृष्यात् अकार्क्षीत् अक्राक्षीत् स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वा
च्यः अकृक्षत् अकृष्ट अकृक्षातां अकृक्षत मुच्लृ मोचने शे मुचादीनां सिच्कृतविदलिपपि

ल॰
कौ॰
मु६

वृहात्विदपिशांतुम् मुंचति मुंचते मोक्ता मुच्यात् मुक्षीष्ट अमुचत् अमुक्त अमुक्ताता लु
प्लृ छेदने लुंपति लुंपते लोप्ता अलुपत् विद्लृ लाभे विंदति विंदते विवेद विविदे व्याघ्रभूतिमते
सेट् वेदिता भाष्यमतेऽनिट् परिवेत्ता षिच क्षरणे सिंचति सिंचते लिपिसिचिह्वश्च पेभ्य च्ले
रङ् असिचत् आत्मनेपदेष्वन्यतरस्यां लिपिसिचिह्वः परस्मैपदे अङ् वा असिचत असिक्त कृ विक्षे
पे ऋत इद्धातोः किरति चकार करिता करीता कीर्यात् अकारीत् गॄ निगरणे अचि विभाषा गिरतेरेफ
स्य लो जादौ गिरति गिलति जगार जगाल जगरिथ जगलिथ गरिता गरीता गलिता गली
ता प्रच्छ ज्ञीप्सायां ग्रहिज्यादि पृच्छति पप्रच्छ प्रष्टा पृच्छ्यात् अप्राक्षीत् मृङ् प्राणत्यागे म्रियतेर्लु
ङ्लिङोः लुङ्लिङोः शितश्च प्रकृतिभूतान् म्रङ् तङ् नान्यत्र रिङ् इयङ् म्रियते ममार ममा
रे मर्ता मरिष्यति मृषीष्ट अमृत इति तुदादयः रुधिर् आवरणे रुधादिभ्यः श्नम् शपोपवादः रु
णद्धि श्नसोरल्लोपः रुन्धः रुन्धंति रुणत्सि रुंधः रुंध रुणध्मि रुध्वः रुध्मः रुंधे रुरोध रु

६८

रुंध रोद्धा रोत्स्यति रोत्स्यते रुणद्धु रुंधात् रुंधां अरुणत् अरुणः अरुंधः अरुंधातां रुंध्यात् रुंधी
त रुत्सीष्ट अरुंधत अरौत्सीत् अरुद्ध अरोत्स्यत् अरोत्स्यत एवं भिदिर् विदारणे छिदिर् द्वैधीकर
णे युजिर् योगे शिष्लृ विशेषणे शिनष्टि शिंष्टः शिंषंति शिनक्षि शिशेष शिशेषिथ शेष्टा शे
क्ष्यति हिंधि शिनष्टु अशिनट् शिंष्यात् अशिषत् अशेक्ष्यत् एवं पिष्लृ संचूर्णने भंजो आम
र्दने श्नान्नलोपः श्नमः परस्य नस्य लोपः भनक्ति बभंजिथ बभंक्थ भंक्ता भुज पालनाभ्यवहा
रयोः भुनक्ति भोक्ता भोक्ष्यति अभुनक् ञिइंधी दीप्तौ इन्द्धे इंधाते इंधते इंत्से इंधाथे इंधिता
इंधां इंधातां इंधतां इंधै ऐंध ऐंधातां ऐंधत ऐंधाः ऐंधाथां विद विचारणे विंत्ते विक्ता इति रुधादि
तनु विस्तारे तनोति तनुते ततान तेने तनिता तनुयात् तन्वीत तन्यात् तनिषीष्ट अतनीत् अ
तानीत् तनादिभ्यस्तथासोः तनादेः सिचो वा लुक् तथासोः अतत अतनिष्ट अतथाः अतनिष्ठाः
अतनिष्यत अतनिष्यत डुकृञ् करणे करोति अत उत्सार्वधातुके कुरुतः न भकुर्छुरां भस्य

लौ°
[illegible]
३७

कुर्छुरोरुपधाया नदीर्घः कुर्वंति नित्यंकरोतेः करोतेः प्रत्ययोकारस्य नित्यं लोपो य्वोः कुर्वः कुर्मः
कुरुते चकार चकर्थ चकृव चक्रे कर्त्ता करिष्यति करिष्यते करोतु कुरुतात् अकरोत् अकुरु
त ये च कृञउलोपो यादौ प्रत्यये कुर्यात् कुर्वीत क्रियात् कृषीष्ट अकार्षीत् अकृत अकृत अक
रिष्यत् संपरिभ्यांकरोतौभूषणे आभ्यांकरोतेः स्कुड्भूषणे संस्करोति मनु अवबोधने मनुते
मेने मनिता मनिष्यते मनुतां अमनुत मन्वीत मनिषीष्ट अमनिष्ट अमनिष्यत इति तनादिः
डुक्रीञ्द्रव्यविनिमये क्र्यादिभ्यः श्ना शपोपवादः क्रीणाति ईहल्यघोः क्रीणीतः श्नाभ्यस्तयोरातः
क्रीणंति क्रीणासि क्रीणीथः क्रीणीथ क्रीणामि क्रीणीवः क्रीणीते क्रीणाते क्रीणते क्रीणी
षे क्रीणाथे क्रीणीध्वे क्रीणे क्रीणीवहे चिक्राय चिक्रियतुः चिक्रियुः चिक्रेथ चिक्रियिथ
चिक्रिये क्रेता क्रेष्यति क्रेष्यते क्रीणातु क्रीणीतात् क्रीणीतां अक्रीणात् अक्रीणीत क्रीणीयात्
क्रीणीत क्रीयात् क्रेषीष्ट अक्रैषीत् अक्रेष्ट अक्रेष्यत् अक्रेष्यत प्रीञ्तर्पणेकांतौच प्री ३८

३७

णाति प्रीणीते ष्ट्वञ्प्वादीनां ह्रस्वः शिति पुनाति पुनीते पविता लूञ् छेदने लुनाति लुनीते
स्तृञ् आच्छादने स्तृणाति स्तृणीते तस्तार तस्तरतुः तस्तरे स्तरिता स्तरीता स्तरिष्यति स्तृणातु स्तृ
णीतात् लिङ्सिचोरात्मनेपदेषु वृङ्वृञ्भ्यामृदन्ताच्च परयोर्लिङ्सिचोरिड्वा स्यात्तङि न लिङि वॄत इटो लि
ङि न दीर्घः स्तरिषीष्ट उश्च स्तृषीष्ट सिचि च परस्मैपदेषु अस्तारीत् अस्तारीत् अस्तारिष्टां अस्तरि
ष्ट अस्तरीष्ट अस्तरिष्ट वृञ् वरणे वृणाति वृणीते ववार ववरे वरिता वरीता धूञ् कम्पने धूनाति
धूनीते धोता धविता अधावीत् अधविष्ट अधोष्ट ग्रह उपादाने गृह्णाति गृह्णीते जगृहे ग्रहोऽलि
टि दीर्घः एकाचो ग्रहेर्विहितस्येटो दीर्घो न तु लिटि ग्रहीता लिटि तु जग्रहिथ गृह्णातु हलः श्नः शा
नज्झौ हलः परस्य श्नः शानजादेशो हौ गृहाण गृह्यात् ग्रहीषीष्ट ह्म्यन्तेति न वृद्धिः अग्रहीत् अग्रही
ष्ट अग्रहीषाताम् कुष निष्कर्षे कुष्णाति कोषिता अश भोजने अश्नाति आश अशिता अशिष्यति अ
श्नातु अशान मुष स्तेये मोषिता मुषाण ज्ञा अवबोधने जानाति जज्ञौ [illegible] वबन्ध व

वृषे ववृषे वरिता वरीता अवरीष्ट अवृत इति क्र्यादिः ॥ चुर स्तेये सत्यापपाशरूपवीणातूलश्लोकसे
नालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ॥ स्वार्थेऽर्थगते निगुणः सनाद्यन्ता इति धातुत्वं तिपू श
बादि गुणायादेशौ चोरयति णिचश्च णिजन्तादात्मनेपदं कर्तृगामिनि क्रियाफले चोरयते चोर
यामास चोरयिता चोर्यात् चोरयिषीष्ट णिश्रिद्रुस्रुभ्यः चङः णौचङ्युपधाया ह्रस्वः हिल्वं हलादिः शेषः दि
र्घो लघोरित्यभ्यासस्य दीर्घः अचूचुरत् अचूचुरत अचूचुरतां कथ वाक्यप्रबंधे अल्लोपः अचः
परस्मिन् पूर्वविधौ परनिमित्तोऽजादेशः स्थानिवत्स्यात् स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्त
व्य इति स्थानिवत्त्वान्नोपधावृद्धिः कथयति अग्लोपित्वाद्दीर्घसन्वद्भावौ न अचकथत् गण सं
ख्याने गणयतेरीच्च गणः गणयतेरभ्यासस्य ईत्स्यात् चङ्परे णौ अजीगणत् इति चुरादिः ॥
स्वतंत्रः कर्ता क्रियायां स्वातंत्र्येण विवक्षितोऽर्थः कर्ता स्यात् तत्प्रयोजको हेतुश्च कर्तुः प्रयोजको
हेतुसंज्ञः कर्तृसंज्ञश्च हेतुमति च प्रयोजकव्यापारे प्रेरणादौ वाच्ये धातोर्णिच् भवति प्रेरयति

भावयति स्रोः पुयण्ज्यपरे सनि परे यदंगं तदवयवाभ्यासस्येत इत्स्यात्‌ पवर्गयण्जकारे चावर्णप
रेषु परतः पवी भवत गतेनिवृत्तो अर्तिह्री ली री क्नू यी क्ष्माय्यातां पुङ्णौ स्थापयति तिष्ठतेरित
उपधाया इः परे णौ अतिष्ठिपत घटचेष्टायां घटादयो मितः जनी च मितां ह्रस्वः घटादीनां ज्ञपा
दीनां च णौ उपधाया ह्रस्वः घटयति ज्ञपयति अजीघटत इति णिजन्तः धातोः कर्मणः समानकर्तृक
दिच्छायां वा इषिकर्मणो धातोरिषिणैककर्तृकात्सन्वेच्छायाम पठितुमिच्छायां सन्यङोः सन्नन्तस्य यङ
न्तस्य च प्रथमस्यैकाचो द्वे स्तः अजादेस्तु द्वितीयस्य सन्यतः पठितुमिच्छति पिपठिषति अपिपठिषी
त कर्मणः किं गमनेनेच्छति समानकर्तृकात्किं शिष्याः पठन्त्विति इच्छति गुरुः वाग्रहणाद्वाक्यम
पि लुङ्सनोर्घस्लृ सस्यार्द्धधातुके सः स्यार्द्धधातुके अत्तुमिच्छति जिघत्सति एकाच उ
तिनेट अज्झनगमां सनि अजन्तानां हन्तेरजादेशगमेश्च दीर्घो झलादौ सनि इको झल इगन्ताच्च
झलादिः सन्कित कर्तुमिच्छति चिकीर्षति सनि ग्रहगुहोश्च ग्रहेर्गुहेरुगन्ताच्च सन इण्न भवति

ल॰
कौ॰
३९

इति सनन्ताः धातोरेकाचो हलादेः क्रियासमभिहारे यङ् पौनःपुन्ये भृशार्थे च द्योत्ये धातोरेका
चो हलादेर्यङ् गुणो यङ्लुकोः अभ्यासस्य गुणः यङि लुकि च परतः ङिदन्तत्वादात्मनेपदं पु
नः पुनरतिशयेन भवति बोभूयते बोभूयांचक्रे अबोभूयिष्ट नित्यं कौटिल्ये गतौ गत्यर्था
त्कौटिल्य एव यङ् न क्रियासमभिहारे दीर्घोकितः अकितोभ्यासस्य दीर्घो यङ्लुकोः कुटिलं व्रज
ति वाव्रज्यते यस्य हलः हलः परस्य लोपश्चार्धधातुके आदेः परस्य अतो लोपः वाव्रजांचक्रे वाव्र
जिता रीगृदुपधस्य च ऋदुपधस्य धातोरभ्यासस्य रीगागमो यङ्लुकोः वरीवृत्यते वरीवृतांचक्रे
वरीवृतिता क्षुभ्नादिषु च क्षुभ्नादेराकृतिगणे णत्वं न नरीनृत्यते जरीगृह्यते इति यङन्ताः य
ङोचि च यङोचि प्रत्यये लुक् स्यात् चकारात्तं विनापि क्वचित् अनैमित्तिकोयमन्तरङ्गत्वादादौ
भवति ततः प्रत्ययलक्षणेन यङन्तत्वाद्द्वित्वमभ्यासकार्यं धातुत्वाल्लडादयः शेषात्कर्तरि पर
स्मैपदं चर्करीतं चेत्यदादौ पाठात् शपो लुक् यङो वा यङन्तात्परस्य हलादेः पितः सार्वधातुक ३२

स्वेड्डुक्तम्मत भूसुवोस्तिङिगुणनिषेधोप ङुकिमाषाद्यांन वोभूतते तेतिक्तं इतिछंदसिनिपातना
त् वोभवीति वोभोति वोभूतः वोभुवति वोभवीषि वोभोषि वोभूथः वोभूथ वोभवीमि वोभोमि
वोभूमः वोभुवंति वोभविषि वोभवांचकार वोभवां बभूव वोभवामास वोभविता वोभविष्य
ति वोभवीतु वोभोतु वोभूतात् वोभूतां वोभुवंतु वोभूहि वोभवानि अवोभवीत् अवोभोत् अ
वोभूतां अवोभुवुः वोभूयात् वोभूयातां वोभूयुः वोभूयात् वोभूयास्तां वोभूयासुः गातिस्थे
ति सिचो लुक् यङोवेतीट् पक्षेगुणं वाधित्वा नित्यत्वात् अवोभवीत् अवोभोत् अवोभूतां अ
वोभूवुः अवोभविष्यत् इतियङ्लुगंताः सुपआत्मनःक्यच् इषिकर्मणः एषितुरात्मसंबंधिनः
सुवंतादिच्छायामर्थेक्यज्वा स्यो धातुप्रातिपदकयोः एतयोरवयवस्य सुपोलुक् काम्यच्च अव
णस्याद्दे आत्मनः पुत्रमिच्छति पुत्रीयति नःक्ये नांतमेव पदं नान्यत् नलोपः राजीयति
नांतमेवेति किं वाच्यति हलि च गीर्यति धूर्यति धामोसित्येव नेह दिवमिच्छति दिव्यति कास्य।

ल. कौ. ७०

विभाषाहलः परयोः क्यङो लोपो वा ईधात्वके आदेः परस्य अतो लोपः तस्य स्थानिवत्वाल्लघूपधगु
णोन समिधिता समिध्यिता काम्यच्च उक्तविषये काम्यच्च पुत्रमात्मन इच्छति पुत्रकाम्यति पु
त्रकाम्यिता उपमानादाचारे उपमानात्कर्मणः कर्तुश्च आचारेर्थे क्यच् पुत्रमिवाचरति पुत्रीय
ति छात्रं विष्णूयति द्विजं सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः अतो गुणे कृष्ण इवाचरति कृष्णति
स्व इवाचरति स्वति सस्वौ सस्व अनुनासिकस्य क्विझलोः क्ङिति अनुनासिकान्तस्योपधाया
दीर्घः क्वौ ऊलादेश्च क्ङिति इदमिवाचरति इदामति राजेवाचरति राजानति इन्निति निय
मान्नेह्लोपयादीर्घः पंथा इवाचरति पथीनति कष्टाय क्रमणे चतुर्थ्यन्तात्कष्टशब्दाङ्ङस्य हेर्थे
क्यङ् कष्टाय क्रमते कष्टायते पापं कर्तुमुत्सहत इत्यर्थः शब्दवैरकलहाभ्रकण्वमेघेभ्यः कर
णे एभ्यः कर्मभ्यः करोत्यर्थे क्यङ् शब्दं करोति शब्दायते तत्करोति तदाचष्टे णिच् वा णाविष्टवत्प्रा
तिपदिकस्य इष्टवत्प्रातिपदिकस्य पुंवद्भावटिलोपः विन्मतुब्लोपयणादिलोपप्रस्थस्फाद्यादे

शुभंसत्तानल्हहस्मवपिसहृत्यलोपः चंडं करोत्यात्मचेष्टावाचदति इतिनामधातुप्रक्रियाकंड्वादि
भ्यो यक् कुपभ्यो धातुभ्यो नित्यं यत्स्वार्थे कंडूञ् गात्रविघर्षणे कंडूयति कंडूयति कंडूयते इत्या
दिः कर्त्तरि कर्मव्यतिहारे क्रियाविनिमये वाच्ये कर्त्तर्यात्मनेपदं स्यात् व्यतिलुनीते अन्यस्य
योग्यं लवनं करोतीत्यर्थः न गतिहिंसार्थेभ्यः व्यतिगच्छति व्यतिघ्नंति नेर्विशः निविशते
परिव्यवेभ्यः क्रियः परिक्रीणीते विक्रीणीते अवक्रीणीते विपराभ्यां जेः विजयते सन्लि
टोर्जेः कुत्वं विजिग्ये पराजयते समवप्रविभ्यः स्थः संतिष्ठते अवतिष्ठते प्रतिष्ठते वितिष्ठते
अपह्नवे ज्ञः शतमपजानीते अपलपतीत्यर्थः अकर्मकाच्च सर्पिषो जानीते सर्पिषोपायेन
प्रवर्त्ततीत्यर्थः उदश्चरः सकर्मकात् धर्ममुच्चरते लंघयतीत्यर्थः समस्तृतीयायुक्ता
त् रथेन संचरते दाणश्च सा चेच्चतुर्थ्यर्थे समो दाणस्तृतीयान्तेन युक्तादुक्तो स्यात् तृतीया चेच्च
तुर्थ्यर्थे अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया दास्या संयच्छते कामी सर्वत्रात्मनःस्तनः

ल. कौ.
५१

